PQ6YCH

# 16. दीपावलिः



अस्माकं देशस्य नाम भारतवर्षः । एतस्मिन् देशे बहवः धर्मावलम्बिनः निवसन्ति । अतः अत्र अनेके उत्सवाः आयोज्यन्ते । एतेषु उत्सवेषु दीपावलिः अपि विशिष्टः महोत्सवः । अस्य नाममात्रेण अपि जनानां मनसि आनन्दस्य सञ्चारः भवति । यदा श्रीरामः रावणं जित्वा चतुर्दशवर्षस्य वनवासानन्तरम् अयोध्याम् आगच्छत् तदा सर्वेऽपि जनाः सोत्साहेन नगरीं सुसज्जिताम् अकुर्वन् । ते च दीपानां पंक्तिभिः श्री रामस्य स्वागताय परमानन्द-प्रदर्शनम् अकुर्वन् । जनाः एनम् उत्सवं कार्तिक मासस्य अमावस्यायां तिथौ मन्यन्ते । एवम् अयम् उत्सवः प्रतिवर्षं सम्पूर्णभारतवर्षे सोत्साहं समायोज्यते ।

इदानीं भारतीयाः दीपावल्याः पूर्वमेव स्वगृहाणि स्वच्छानि सुधाधौतानि च कारयन्ति।

गृहेषु जीर्णानां वस्तूनां स्थाने नवानि वस्तूनि आनीयन्ते । चित्रैः मूर्तिभिः च गृहाणि सुसज्जितानि क्रियन्ते । मिष्टान्नविक्रेतारः नवनवैः मिष्टान्नैः पण्यालयानि सुसज्जितानि कुर्वन्ति । विपणिषु जनानां महती गतागतिः भवति, महत् कोलाहलं च भवति ।

दीपावल्यां जनाः नूतनानि वसनानि धारयन्ति । ते पण्यवीथिकासु गत्वा बहुविधानि वस्तूनि क्रीणन्ति । ते मिष्टान्नानि क्रीत्वा इष्टमित्रेषु वितरन्ति । ते नानाविधानि विस्फोटकानि विस्फोटयन्ति । जनाः लक्ष्मीं पूजयित्वा मिष्टान्नानि खादन्ति । अयं उत्सवः भारतीयैः बहुउत्साहेन आयोज्यते। केचन् जनाः दीपावल्याः रात्रौ द्यूतक्रीडां कुर्वन्ति, मद्यपानम् अपि कुर्वन्ति तथा अनर्गलं व्यवहरन्ति एतत् तु न युक्तम् ।



एषः महोत्सवः आनन्दोत्सवः च । कुत्सितकर्माणि परित्यज्य सर्वैः श्रद्धया आनन्देन च आयोजनीयः ।

## शब्दार्थाः

| | | |
|---|---|---|
| एतस्मिन् | - | इसमें |
| आयोज्यन्ते | - | मनाते हैं |
| उत्सवेषु | - | त्यौहारों में |
| विशिष्टः | - | विशेष |
| सञ्चारः | - | प्रवेश, पहुंच |
| जित्वा | - | जीतकर |
| चतुर्दशवर्षस्य | - | चौदह वर्ष का |
| वनवासान्तरम् | - | जंगल में वास के बाद |
| आगच्छत् | - | आये |
| सुसज्जिताम् | - | सजाने का काम |
| अकुर्वन् | - | किये |
| अमावस्यायाः | - | (कृष्ण पक्ष की पंद्रहवीं तिथि)अमावस्या में |
| सुधाधौतानि | - | सफाई, लिपाई, पोताई |
| जीर्णानाम् | - | पुराने (जीर्णो का) |
| आनीयन्ते | - | लातेहैं |
| नवनवैः | - | नए-नए |
| पण्यालयानि | - | दुकानों (बाजारों) को |
| विपणिषु | - | दुकानोंमें |
| महती | - | बड़ी |
| गता-गतिः | - | आना-जाना |
| कोलाहलम् | - | शोरगुल |
| वसनानि | - | कपड़ों को |
| पण्यवीथिकासु | - | बाजार की गलियों में |
| क्रीत्वा | - | खरीदकर |
| विस्फोटकानि | - | फटाकों को |
| द्यूतक्रीडाम् | - | जुआ |
| मद्यपानम् | - | शराब पीना |
| अनर्गलम् | - | व्यर्थ |
| युक्तम् | - | उचित |
| कुत्सितानि | - | खराब |
| आयोजनीयः | - | मनाया जाना चाहिये |

## अभ्यासः

**1. निम्नलिखित प्रश्नों के उत्तर संस्कृत भाषा में दीजिए-**

1. अस्य देशस्य नाम किम् ?
2. दीपावलिः कस्मात् कारणात् मन्यते ?
3. दीपावलिः कस्यां तिथौ दिवसे भवति ?
4. जनाः गृहेषु किं-किं कार्यं कुर्वन्ति ?
5. जनाः कार्तिक मासस्य अमावस्यायां तिथौ कस्य पूजनं कुर्वन्ति?

**2. रिक्त स्थानों की पूर्ति कीजिए-**

1. हरिः मिष्टान्नं .......... ।
2. जनाः नूतनानि वसनानि ................ ।
3. बहुधा जनाः विस्फोटकानि ................।
4. केचन जनाः ............ कुर्वन्ति ।
5. रामः रावणं जित्वा अयोध्यां ................ ।

**3. निम्न शब्दों से धातु और प्रत्यय पृथक कीजिए-**

जित्वा
गत्वा
क्रीत्वा
पूजयित्वा
नीत्वा ।

**4. निम्नलिखित शब्दों का उपयोग कर वाक्य बनाइए-**

अत्र
कोलाहलम्
विपणिषु
केचन्
तदा ।

PQFUEA